# Dharmadhatunama Stava

# धर्मधातुनामस्तवः

## Document Information

Text title : Dharmadhatunama Stava

File name : dharmadhAtunAmastavaH.itx

Category : misc, buddha, stava

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# धर्मधातुनामस्तवः

वं कारं वज्रसत्त्वं च वज्रासनसदास्थितम् ।
वारुणमण्डलव्यापि वैरोचन नमोऽस्तु ते ॥ १॥

अकारमादिस्वभावमाकाशे व्यापितं तथा ।
अर्कनीलसमस्तेज अक्षोभ्यश्री नमोऽस्तु ते ॥ २॥

रकारं लक्ष्मीस्वभावं नानारत्नमनेकधा
रं व्यापितं च पृथ्वीं रत्नसम्भव नमोऽस्तु ते ॥ ३॥

अकारमस्थिरं भावं पद्मनागसमप्रभम् ।
अग्नितेजःसमाधिस्थममिताभ नमोऽस्तु ते ॥ ४॥

अकारं तत्स्वभावं च गन्धवाहसमप्रभम् ।
अकारविश्ववज्रं च अमोघसिद्धि नमोऽस्तु ते ॥ ५॥

धकारं धर्मस्वभावं धर्मसङ्घस्वरूपकम् ।
धात्वष्टकं कीर्तितं च धर्मधातु नमोऽस्तु ते ॥ ६॥

सकारं सर्वसम्पत्तिः सर्वमङ्गलमर्थनम् ।
सर्वसिद्धिस्त्वमेवाथ सिद्धिवज्र नमोऽस्तु ते ॥ ७॥

इति श्री धर्मधातुनामस्तवः समाप्तः ॥

*Dharmadhatunama Stava*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*